3195

# B.A. 4th Semester (General) Examination, 2023 (CBCS)

## Subject : Sanskrit

## Course : CC-1D/GE-4

Liabrary

**Time: 3 Hours** **Full Marks: 60**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answer in their own words as far as applicable.*

1. Instructions for GE-4 (Honours student of other discipline). 2×10=20

अधोलिखितेषु प्रश्नेषु दशप्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिपिमाश्रित्य देयम्। तत्र 'क' विभागतः प्रश्नषट्कं 'ख' विभागतश्च प्रश्नचतुष्टयमवश्यमेव चयनीयम्।

নিম্নলিখিত প্রশ্নগুলির মধ্যে দশটি প্রশ্নের উত্তর সংস্কৃতভাষায় দেবনাগরী লিপিতে লিখতে হবে। তার মধ্যে 'ক' বিভাগ থেকে ছয়টি এবং 'খ' বিভাগ থেকে চারটি প্রশ্নের উত্তর অবশ্যই দিতে হবে।

Instructions for CC-4 (General students). 2×10=20

निम्नलिखितेषु प्रश्नेषु 'क' विभागतः प्रश्नषट्कं 'ख' विभागतश्च प्रश्नचतुष्टयमाश्रित्य दशप्रश्नानामुत्तरं प्रदेयम्। तेषु द्वयोः संस्कृतभाषया उत्तरमवश्यमेव लेखनीयम्।

নিম্নলিখিত প্রশ্নগুলির মধ্যে 'ক' বিভাগ থেকে ছয়টি এবং 'খ' বিভাগ থেকে চারটি প্রশ্ন নিয়ে মোট দশটি প্রশ্নের উত্তর দিতে হবে। তাদের মধ্যে দুটি প্রশ্নের উত্তর সংস্কৃতভাষায় অবশ্যই লিখতে হবে।

'क' विभागः

'ক' বিভাগ

(a) किं नाम कर्मप्रवचनीयम्?
কর্মপ্রবচনীয় কী?

(b) प्रासङ्गिकं सूत्रमुल्लिख्य 'टि' इति संज्ञायाः सोदाहरणं व्याख्या कार्या।
প্রাসঙ্গিক সূত্র উল্লেখ করে 'টি'-এর সংজ্ঞা উদাহরণসহ ব্যাখ্যা করো।

(c) 'वृद्धिरादैच्'– इत्यत्र 'आदैच्' पदेन किं बोध्यते? वृद्धि शब्दस्य कोऽर्थः?
'বৃদ্ধিরাদৈচ্'—এখানে 'আদৈচ্' পদের দ্বারা কী বোঝায়? বৃদ্ধি শব্দের অর্থ কী?

(d) को नाम 'घु' इति? सूत्रमुल्लिख्यताम्।
'ঘু' কাকে বলে? সূত্র উল্লেখ করো।

(e) शून्यस्थानं पूरयतु '__________ गुणः'। का संज्ञा अत्र निर्दिश्यते?
শূন্যস্থান সম্পূর্ণ করো '__________ গুণঃ'। এখানে কোন সংজ্ঞার নির্দেশ করা হয়েছে?

(f) व्याकरणशास्त्रे 'वार्तिकम्' इत्यनेन किं बोध्यते?
ব্যাকরণশাস্ত্রে 'বার্তিক' বলতে কী বোঝায়?

(g) पाणिनिमतानुसारेण 'निपात' इति सूत्रं व्याख्यायताम्।
পাণিনির মত অনুসরণে 'নিপাত' সূত্রটি ব্যাখ্যা করো।

(h) सोदाहरणं 'भाष्य' इति संज्ञायाः लक्षणं दीयताम्।
উদাহরণসহ 'ভাষ্য' সংজ্ঞার লক্ষণ উল্লেখ করো।

(i) सोदाहरणं 'गति' इति संज्ञायाः लक्षणं दीयताम्।
উদাহরণসহ 'গতি' সংজ্ঞার লক্ষণ উল্লেখ করো।

'ख' विभागः

'খ' বিভাগ

(a) निम्नलिखितेषु पदेषु कस्यचित् पदद्वयस्य व्युत्पत्तिं निरूपयत।
নীচের যে কোনো দুটি পদের ব্যুৎপত্তি নির্ণয় করো।
सोढुम्, प्रोष्य, देयम्, प्रियंवदः

(b) निम्नलिखितेषु द्वयोः परिनिष्ठितं रूपं लिखत।
নীচের যে কোনো দুটির পরিনিষ্ঠিত রূপ লেখো।
प्र-विश + ल्यप्, प्र-ब्रू + ल्यप्, कृ-णिच् + लट् ति, पा-सन् + लट् ति

(c) निम्नोक्तेषु अशुद्धपदानां शुद्धरूपं निर्णेयम्।
নিম্নলিখিত অশুদ্ধ পদগুলির শুদ্ধরূপ নির্ণয় করো।
(i) महाराजा प्रजान् शास्ति।
(ii) वर्षायां पिच्छलाः पन्था।

(d) णिजन्तधातुनिष्पन्नयोः द्वयोः पदयोरुल्लेखः करणीयः।
ণিজন্তধাতুনিষ্পন্ন দুটি পদের উল্লেখ করো।

(e) एकपदीकरणं क्रियताम् (यथाकामं द्वयम्)।
এককথায় প্রকাশ করো (যে কোনো দুটি)।
शब्दं करोति, पुनः पुनः पिवन्ति
सभायां साधुः, महत् अरण्यम्।

(f) यङ्प्रत्ययनिष्पन्नं पदद्वयं लिख्यताम्।
যঙ্প্রত্যয়নিষ্পন্ন যে কোনো দুটি পদের উদাহরণ দাও।

2. अधोनिर्दिष्टेषु प्रश्नेषु यथेच्छं चतुर्णां प्रश्नानामुत्तरं देयम। तन्मध्ये प्रश्नद्वयं संस्कृतभाषया लिख्यताम्। 5×4=20
নিম্নলিখিত প্রশ্নগুলির মধ্যে চারটি প্রশ্নের উত্তর দিতে হবে। তার মধ্যে দুটি প্রশ্নের উত্তর অবশ্যই সংস্কৃত ভাষায় লিখতে হবে।

(a) संस्कृतभाषायाम् क्त्वाच्-प्रत्यायानां विविधप्रयोगाः आलोच्यन्ताम्।
সংস্কৃতভাষায় ক্ত্বাচ্-প্রত্যয়ের বিবিধ প্রয়োগ আলোচনা করো।

(b) अर्थसहयोगेन कतिपय-णिजन्तधातुनां प्रयोगान् प्रदर्शय।
অর্থসহযোগে কিছু ণিজন্তধাতুসমূহের প্রয়োগ দেখাও।

(c) का 'निष्ठा'? वर्तमाने 'क्त' विधायकं सूत्रमालोच्यताम्

'निष्ठा' বলতে কী বোঝো? বর্তমানকালে 'क्त' বিধায়ক সূত্র আলোচনা করো।

(d) संस्कृतभाषायाम् उपसर्गाणां विविधप्रयोगाः आलोच्यन्ताम्।

সংস্কৃতভাষায় উপসর্গের বিবিধ প্রয়োগ আলোচনা করো। 2½×2=5

(e) संक्षिप्ता टीका कार्या (यथेच्छं द्वयम्)

সংক্ষিপ্ত টীকা লেখো (যেকোনো দুটি)

उपधा, नदी, घिः। 2½×2=5

(f) सार्थकवाक्यरचनया अर्थपार्थक्यं निर्दिश (यत्किञ्चन द्वितयम्)

যে কোনো দুজোড়া পদের সার্থক বাক্যরচনার মাধ্যমে অর্থপার্থক্য দেখাও।

(i) वाक्यम्- वाच्यम्

(ii) राजन्वान्- राजवान्

(iii) सूर्या- सूरी

(iv) आम्रम्- आम्रः

**3.** अधोनिर्दिष्टेषु विभागद्वयेषु प्रश्नमेकमाश्रित्य प्रश्नद्वयस्य उत्तरं दीयताम्। 10×2=20

নিম্নলিখিত বিভাগ দুটি থেকে একটি করে প্রশ্ন নিয়ে মোট দুটি প্রশ্নের উত্তর দিতে হবে।

'क' विभागः

'ক' বিভাগ

(a) (i) दृष्टान्तयोगेन 'णिच्-प्रत्यय' विषयकं संक्षिप्तवर्णनं प्रदेयम्

নিচ্-প্রত্যয় সম্বন্ধে উদাহরণ সহযোগে সংক্ষিপ্ত বর্ণনা দাও। 5+5

(ii) 'कृत्यप्रत्यय' विषयकं संक्षिप्तवर्णनं प्रदेयम्।

কৃত্যপ্রত্যয় সম্বন্ধে উদাহরণ সহযোগে সংক্ষিপ্ত বর্ণনা দাও।

(b) कुत्र 'सन्'-'यङ्' इति प्रत्ययद्वयस्य प्रयोगाः परिलक्ष्यन्ते? दृष्टान्तयोगेन आलोच्यताम्।

কোথায় 'সন্'-'যঙ্' প্রত্যয়ের প্রয়োগসমূহ দেখা যায়? উদাহরণসহ আলোচনা করো।

'ख' विभागः

'খ' বিভাগ

अधोलिखितमनुच्छेदं पठित्वा प्रदत्तप्रश्नानामुत्तराणि सुरगिरा लिखत 10

নিম্নলিখিত অনুচ্ছেদটি পাঠ করে প্রদত্ত প্রশ্নসমূহের উত্তর লেখো (সংস্কৃত ভাষায়)

(a) अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः। तस्य कोटरे दैवदुर्विपाकाद् गलितनखनयनो जरद्गवो नामो गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चिदुद्धृत्य ददति। तेनासौ जीवति। शावकानां रक्षणं करोति। अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्रागतः। ततस्तमायान्तं दृष्ट्वा पक्षिशावकैः भयार्तः कोलाहलः कृतः।

(i) कुत्र आसीत् महान् पर्कटीवृक्षः? 1

(ii) तस्य कोटरे कः प्रतिवसति? 1

(iii) गृध्रस्य किमासीत् नाम? 1

(iv) केन प्रकारेण गृध्रः जीवति? 2

(v) शावकानां रक्षणं कः कथं च करोति? 2

(vi) किमासीत् मार्जारस्य नाम? 1

(vii) मार्जारं दृष्ट्वा पक्षिशावकैः किं कृतम्? 2

(b) अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बुपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। अथ कदाचित् तस्य तरोरधस्तात् करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः- भोः! भवान् समभ्यागतो मेऽतिथिः, तद् भक्षयतु मया दत्तान्यमृतकल्पानि जम्बुफलानि। एवमुक्त्वा तस्मै जम्बुफलानि ददौ। सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनं गतः। एवं नित्यमेव तौ वानरमकरौ, जम्बुच्छायाश्रितौ विविधालापेन कालं नयन्तौ सुखेन तिष्ठतः।

(i) जम्बुपादपः कीदृशः आसीत्? 1

(ii) वानरः कुत्र वसति स्म? 1

(iii) वानरस्य नाम किम्? 1

(iv) करालमुखः कस्य नाम? 1

(v) करालमुखः कुतः समागतः कुत्र च न्यविशत्? 2

(vi) वानरः करालमुखं किमुक्तवान्? 2

(vii) जम्बुफलानि खादित्वा मकरः किमकरोत्? 2

---